# यस्यालीयत शल्कसीम्नि... इत्यादिश्लोकव्याख्या

लक्ष्मी-नारायण-नायेकः

**भूमिका** उत्कलवासी आचार्यः विश्वनाथः साहित्यकाव्यनाट्यशास्त्रज्ञः आसीत्। कविराजः इति नाम्ना प्रसिद्धोऽयम्। अयमाचार्यः साहित्यदर्पणाख्यं ग्रन्थं रचयामास। ग्रन्थस्यास्य एकस्मिन् श्लोके विश्वनाथः अल्लाउदीनखिलजी इत्याख्यस्य राज्ञः नामस्मरणम् अकार्षीत्। एतेन नृपादस्मात् परं ग्रन्थोऽयं विरचितः इति प्रतीयते। नृपतेः कालः त्रयोदशशतकात् चतुर्दशशतकमध्ये आसीत् इति अनुमीयते। अतः विश्वनाथाचार्यस्य कालः, अपि च साहित्यदर्पणाख्यग्रन्थस्य रचनाकालः चतुर्दशशतकम् आसीत् इत्यपि अनुमीयते। साहित्यदर्पणे काव्यस्य नाट्यस्य च विवेचनं विद्यते। दशसु परिच्छेदेषु विभक्तश्चायं ग्रन्थः।

**प्रसङ्गः** श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे काव्यस्वरूपनिरूपणाख्ये प्रथमे परिच्छेदे वाक्यं रसात्मकं काव्यम् इति काव्यलक्षणे रसः इति पदेन रस-तदाभासादीनां ग्रहणं भवति। एवञ्च अत्रैव प्रत्येकस्य उदाहरणानि दर्शितानि। भावस्य उदाहरणत्वेन प्रस्तुतः अयं श्लोकः कविराजेन उदाहृतः। तथाहि–

यस्यालीयत शल्कसीम्नि जलधिः पृष्ठे जगन्मण्डलं
दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी।
क्रोधे क्षत्रगणः शरे दशमुखः पाणौ प्रलम्बासुरो
ध्याने विश्वमसावधार्मिककुलं कस्मैचिदस्मै नमः॥

**अन्वयः** यस्य शल्कसीम्नि जलधिः अलीयत, पृष्ठे जगन्मण्डलं, दंष्ट्रायां धरणी, नखे दितिसुताधीशः, पदे रोदसी, क्रोधे क्षत्रगणः, शरे दशमुखः, पाणौ प्रलम्बासुरः, ध्याने विश्वम् असौ अधार्मिककुलं कसमैचिद् अस्मै नमः।

**अन्वयार्थः** यस्य नारायणस्य मत्स्यावतारे शरीरैकदेशे समुद्रः अयुज्यत; यस्य नारायणस्य कूर्मावतारे पृष्ठे जगन्मण्डलं लग्नम् अभवत्; यस्य वराहावतारे दशनमण्डले पृथिवी लघुवस्तुवद् अवातिष्ठत; यस्य नरसिंहावतारे करजे दैत्यपतिः हिरण्यकशिपुः लयं प्रापत्; यस्य वामनावतारे चरणे द्यावापृथिव्यौ लीने अभवताम्; यस्य परशुरामावतारे क्षत्रियगणः लयम् अगच्छत्; यस्य बलरामावतारे प्रलम्बासुरः इति एतन्नामकदैत्यस्य लयः अभवत्; यस्य बुद्धावतारे ध्याने जगद् लीनम् अगच्छत्; यस्य च भगवतः कल्किनामावतारे तरवारौ म्लेच्छसमूहः लीनम् अभवत्। इह कस्मैचिद् विशेषतः प्रदर्शयितुम् असम्भवत्वाद् अनिर्वचनीयाय अस्मै नारायणाय पुरुषाय नमः अस्तु इति शेषः।

**व्याख्या** नमस्कारात्मकेऽस्मिन् पद्ये नारायणस्तुतिः विद्यते। एतेन दशावतारवर्णनं कविना सम्यक् प्रतिपादितम्। उदाहृते अस्मिन् पद्ये भगवान् नारायणः एव विशेषः यस्याः सा तथोक्ता रतिः एव भावपदवाच्यः। अत्र भगवद्विषया रतिः सहृदयानां चेतसि कमपि चमत्कारं जनयति इति भावपदव्यपदेशस्य असौ काव्यत्वबीजम्। अत्र 'अ' इति शब्दः विष्णोः वाचकः इति अवगन्तव्यम्। इदं मध्यमकाव्यम् इति केचिद् आहुः इति शिवम्।

**छन्दः** श्लोकोऽयं शार्दूलविक्रीडितच्छन्दसा निबद्धः। च्छन्दः इदं समवृत्ते अन्तर्भवति, यत्र प्रतिपादं नवदशवर्णाः भवन्ति। शार्दूलविक्रीडितच्छन्दसः लक्षणं प्राह केदारभट्टः वृत्तरत्नाकरकारे- "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्" इति। सूर्यः इत्यनेन द्वादशसंख्या द्योत्यते। अश्वशब्दश्च

सप्तसंख्याद्योतकः। अतः नवदशसु अक्षरेषु मध्ये द्वादशाक्षराद् अनन्तरं यतिः भवेत्, ततः सप्ताक्षरात् परं यतिः भवेत्। मसजस्ततताः इत्यनेन मगण-सगण-जगण-सगण-तगण-तगणाः विवक्षिताः। एते च गणाः यथाक्रमं प्रयोक्तव्यम्। एतेषाम् अन्ते एकः गुरुवर्णश्च प्रयोक्तव्यः, तेनैव शार्दूलविक्रीडितच्छन्दः भवति।



[चित्रम् अन्तर्जालात् स्वीकृतम्]